श्री कुमार स्तुतिः (विप्र कृतं)

श्री कुमार स्तुतिः (विप्र कृतं)

विप्र उवाच |
शृणु स्वामिन्वचो मेऽद्य कष्टं मे विनिवारय |
सर्वब्रह्मांडनाथस्त्वमतस्ते शरणं गतः || 1 ||

अजमेधाध्वरं कर्तुमारंभं कृतवानहं |
सोऽजो गतो गृहान्मे हि त्रोटयित्वा स्वबंधनं || 2 ||

न जाने स गतः कुत्राऽन्वेषणं तत्कृतं बहु |
न प्राप्तोऽतस्स बलवान् भंगो भवति मे क्रतोः || 3 ||

त्वयि नाथे सति विभो यज्ञभंगः कथं भवेत् |
विचार्यैवाऽखिलेशान काम पूर्णं कुरुष्व मे || 4 ||

त्वां विहाय शरण्यं कं यायां शिवसुत प्रभो |
सर्वब्रह्मांडनाथं हि सर्वामरसुसेवितं || 5 ||

दीनबंधुर्दयासिंधुः सुसेव्या भक्तवत्सलः |
हरिब्रह्मादिदेवैश्च सुस्तुतः परमेश्वरः || 6 ||

पार्वतीनंदनः स्कंदः परमेकः परंतपः |
परमात्मात्मदः स्वामी सतां च शरणार्थिनां || 7 ||

दीनानाथ महेश शंकरसुत त्रैलोक्यनाथ प्रभो
मायाधीश समागतोऽस्मि शरणं मां पाहि विप्रप्रिय |
त्वं सर्वप्रभुप्रियः खिलविदब्रह्मादिदेवैस्तुत-
-स्त्वं मायाकृतिरात्मभक्तसुखदो रक्षापरो मायिकः || 8 ||

भक्तप्राणगुणाकरस्त्रिगुणतो भिन्नोऽसि शंभुप्रियः
शंभुः शंभुसुतः प्रसन्नसुखदः सच्चित्स्वरूपो महान् |
सर्वज्ञस्त्रिपुरघ्नशंकरसुतः सत्प्रेमवश्यः सदा
षड्वक्त्रः प्रियसाधुरानतप्रियः सर्वेश्वरः शंकरः |
साधुद्रोहकरघ्न शंकरगुरो ब्रह्मांडनाथो प्रभुः
सर्वेषाममरादिसेवितपदो मां पाहि सेवाप्रिय || 9 ||

वैरिभयंकर शंकर जनशरणस्य
वंदे तव पदपद्मं सुखकरणस्य |
विज्ञप्तिं मम कर्णे स्कंद निधेहि
निजभक्तिं जनचेतसि सदा विधेहि || 10 ||

करोति किं तस्य बली विपक्षो
-दक्षोऽपि पक्षोभयापार्श्वगुप्तः |
किंतक्षकोप्यामिषभक्षको वा
त्वं रक्षको यस्य सदक्षमानः || 11 ||

विबुधगुरुरपि त्वां स्तोतुमीशो न हि स्या-
-त्कथय कथमहं स्यां मंदबुद्धिर्वरार्च्यः |
शुचिरशुचिरनार्यो यादृशस्तादृशो वा
पदकमल परागं स्कंद ते प्रार्थयामि || 12 ||

हे सर्वेश्वर भक्तवत्सल कृपासिंधो त्वदीयोऽस्म्यहं
भृत्यः स्वस्य न सेवकस्य गणपस्यागः शतं सत्प्रभो |
भक्तिं क्वापि कृतां मनागपि विभो जानासि भृत्यार्तिहा
त्वत्तो नास्त्यपरोऽविता न भगवन् मत्तो नरः पामरः || 13 ||

कल्याणकर्ता कलिकल्मषघ्नः
कुबेरबंधुः करुणार्द्रचित्तः |
त्रिषट्कनेत्रो रसवक्त्रशोभी
यज्ञं प्रपूर्णं कुरु मे गुह त्वं || 14 ||

रक्षकस्त्वं त्रिलोकस्य शरणागतवत्सलः |
यज्ञकर्ता यज्ञभर्ता हरसे विघ्नकारिणां || 15 ||

विघ्नवारण साधूनां सर्गकारण सर्वतः |
पूर्णं कुरु ममेशान सुतयज्ञ नमोऽस्तु ते || 16 ||

सर्वत्राता स्कंद हि त्वं सर्वज्ञाता त्वमेव हि |
सर्वेश्वरस्त्वमीशानो निवेशसकलाऽवनः || 17 ||

संगीतज्ञस्त्वमेवासि वेदविज्ञः परः प्रभुः |
सर्वस्थाता विधाता त्वं देवदेवः सतां गतिः || 18 ||

भवानीनंदनः शंभुतनयो वयुनः स्वराट् |
ध्याता ध्येयः पितृणां हि पिता योनिः सदात्मनां || 19 ||

इति श्रीशिवमहापुराणे रुद्रसंहितायां कुमारखंडे षष्ठोऽध्याये श्रीकुमारस्तुतिः |